International Journal of Multidisciplinary Trends

E-ISSN: 2709-9369
P-ISSN: 2709-9350
www.multisubjectjournal.com
IJMT 2021; 3(2): 155-158
Received: 02-11-2021
Accepted: 24-12-2021

डॉ0 चुक्का प्रवीणः
रीडर, संस्कृत विभागः
प्रभुत्व महिला कलाशाला
गर्तपुरी, आन्ध्रप्रदेशः, भारत

Corresponding Author:
डॉ0 चुक्का प्रवीणः
रीडर, संस्कृत विभागः
प्रभुत्व महिला कलाशाला
गर्तपुरी, आन्ध्रप्रदेशः, भारत

# रघुवंश काव्ये सुपरिपालना व्यवस्था

**डॉ0 चुक्का प्रवीणः**

**प्रस्तावनाः**

प्राचीन भारतदेशे कीदृशी पालना व्यवसथा आसशीदिति ज्ञातुं रघुवंशमाहाकाव्यम् सम्यगुपयुज्यते। वेदकाले अर्थात् कृतयुगे शासनाव्यवस्था एव आसीत् । तस्य तात्पर्यं राज्यं अराजकं बभूव इति वक्तुं न शक्यते । अति प्राचीनकाले प्रजाः सर्वे सत्वगुणसम्पन्नाः धर्मप्रधानश्च आसन् । न कश्चित् कस्यचित् परस्य वित्तं योषितुं वा नाभिलषति स्म । तद्भावात् अन्योन्याक्रमणेच्छा नाभूत् । एवं सर्वाः प्राणिनः धर्मवर्तिनः ज्ञात्वा देवाः अपि सन्तुष्टाः आसन् । युगपरिवृत्तौ वृत्या क्रमेण प्राणिषु अन्यद्रव्योपेक्षा समजनि । आशया सममेव व्यवहारोऽपि उत्पन्नः। तदैव धर्माधर्मयोः निर्णायकस्य अवसरः अपि अभूत् । तदा देवाः सर्वे सम्भूय ब्रह्माणां प्रार्थयामासुः। ब्रह्मा स्वायंभूवं मनुम् उत्पाद्य धर्मरक्षणार्थं, धर्मशासनार्थं च अधिकरणमकरोत् । ततः स्वायंभुवेन मनुना उक्तः एवं धर्मः मन्वन्तरेण इतरैः मनुभिरपि अनुसुतः । कालानुसारेण तदानीं मनुना प्रोक्ताः केचन धर्माः अनुष्ठाने असाध्यः यद्यपि बभूवुः, तथापि मौलिकाः धर्माः मानवीयमूल्यानि इत्येतद्वयं अद्यापि मनुप्रोक्तमेव अनुश्रियते ।

मनुस्मृतौ इतरेषु धर्मशास्त्रेषु ये धर्माः मानवीयमूल्यरूपाः उपविष्टाः ते सर्वे रघुवंशेऽपि दृश्यन्ते । राजा दण्डस्य धरः रक्षिता च । दण्डभयादेव इदानीमपि प्रजाः सर्वाः स्वपथे वर्तन्ते । दण्डस्थाभावे भीतेरभावात् सर्वे जनाः अधर्ममाचरति । तच्च दण्डस्वरूपं धर्मशास्त्रोक्तं रघुवंशमहाकाव्ये सम्यक् निरूपितम् ।

स राजा पुरुषो दण्डस्य नेता शासिता च सः।
चतुर्णामाश्रमाणां धर्मस्य प्रतिभूः स्मृतः ।।
दण्डशास्ति प्रजास्सर्वा दण्ड एवाभिरक्षति ।
दण्डस्सुप्तेषु जागर्ति दण्डं धर्मं विदर्बुधाः ।।
समीक्ष्य स धृत स्सम्यक् सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणूतस्तु विनाशयति सर्वतः ।। [1]

1. दिलीपः कथं प्रजाः पालयामास इति वर्णने प्रथमं सूर्यवंशजानां राज्ञामत्र प्रजारञ्जकं लक्षणमभूदिति ..

यथाविधि हुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराध दण्डानां यथाकासप्रबोधिनाम् ।। [2]

सूर्यवंशजाः राजानः यथापराधदुणडाः । यथा शब्दस्य योग्यता वीप्सा पदार्थानुवृत्तिः सादृश्यं इत्येते चत्वारः अर्थाः । अत्र योग्यता पदार्थानतिवृत्तिः इत्यर्थं द्वयं अन्वेति । अपराधयोग्यं च तदानीं राजानः विदधतेस्म । यथा कश्चन यत्किञ्चित् द्रव्यस्य चोरः भवति, तत् च अपि चौर्यं उदरपोषणार्थं चेत् ईषत् दण्डेन स दण्ड्यः । विलासकृते परद्रोहचिन्तया च प्रभूतमपहरति तदङ्गत्वेन हिंसां करोति स महता दुणड्येन दण्ड्यः । एवं दण्डितं दृष्ट्वा अन्ये तथाकर्तुं कामाः चौर्यात् विरमति । तथैव लोकस्य स्थितिः भवति । अत एव दिलीपोऽपि अहं दण्डधरः कोऽपि केनिपि दण्डेन मया दण्ड्यः को मां पृच्छति इति गर्वमकृत्वा लोकस्थिति रक्षमार्थमेव दण्डं धृतमितवानिति रघुवंशे वर्णितम् । सर्वेषां आधुनिकानामपि पालकानामनुष्ठेयः धर्मः । तदुक्तं रघुवंशे

स्थित्यै दण्डयतो दण्ड्यान् परिणेतः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः । । [3]

2. राजा प्रजाभ्यः धनं आसददाति एव । किन्तु तत् धनं किं करोति इति प्रष्टुं कोऽपि साहसं न करोति । इदानीमपि आयकरादि रूपेण बहुधनं सर्वकारेण गृह्यते । तदेवं व्ययितमिति पत्रेष्वपि प्रदर्श्यते । एवं व्ययितं चेत् महती वृद्धिः द्रष्टव्या स्यात् । अद्य तत्फलं अनुकूलं न दृष्टम् । दिलीपः प्रजाक्षमार्थमेव धनं गृहीत्वा ततो अधिकं धनं प्रजाक्षेमार्थं व्ययितं करोति स्म ।

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।। [2]

3. प्रजासु राज्ञः कर्तव्यं किमिति रघुवंशकाव्ये स्पष्टं निरूपितम् । राज्ञा प्रजाः प्रथमं विनयोः ततो रक्षणीयः भर्तव्यश्च । एवं स्त्रीरक्षणमपि राज्ञः विशेष कर्तव्यमासीत् । दिलीपः तत् कर्तव्य त्रितयं सम्यगनुष्ठितवान् ।

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः । । [3]

दिलीपे राजनि स्त्रीणां रक्षा दृढा आसीदिति षष्ठे सर्गे सम्यक् निरूपितवान् । तस्मिन् शासितारि स्वैरिणः अपि युवत्यः राजमार्गेषु प्राप्तनिद्राः । तथापि ताः स्प्रष्टुं वायोरपि शक्तिर्नासीत् । किं पुनः इतरस्य इति कविः चमत्करोति । इदानीं कालोऽपि सर्वकारेण तथाविधाः रक्षा स्त्री विषये अवश्या करणीया ।

यस्मिन् महीं शासति वाणिनीनां निद्रां विहारार्धपथष गतवान् ।
वातोऽपि नास्रंसयदंशुकानि को लम्बयेदाहारणाय हस्तम् ।। [4]

न केवलं दिलीपः तद्वंशजाः इतरेऽपि राजानः प्रजारञ्जकाः आसन् । दिलीपपुत्रः रघुः पितेव प्रजाः रक्षति स्म । रञ्जनात् राजा इति राजन् शब्दार्थः । रघुरपि चन्द्रः इव प्रजारञ्जकः अभूत् । रघुरपि पितेव युक्तदण्डः प्रजारञ्जकश्च आसीत् ।

स हि सर्वश्च लोकस्य युक्तादण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ।।
यथा प्रह्लादनानाच्चन्द्रः प्रतापात्तपनो यथा ।
तथाव सोऽभदन्वर्थो राजा प्रकृतिरञ्जनात् । । [5]

अष्टमसर्गे वसिष्ठः रघोः पुत्रं अजं राज्ञां कर्तव्यं उपदिशति । राजा अभ्युदय काले गर्वहितो भवेत् । सदा प्रजाक्षेमतत्पराः राज्यमेवकुटुम्बं मत्वा स्वीयमपि सुखदुःखादिकं प्रजारक्षणे न गणयेदिति वशिष्ठः सन्दशति । तदेव राज्ञः कर्तव्यम् इदानीं पालकेयैरपि अनुष्ठेयम् ।

तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिण ।।
उदये मदवाछ्यमुज्झता श्रुतमाविष्कृतमात्मवत्यया
मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाशनात् ।। 6

राज्ञि धार्मिक प्रजानां रोगादि पीडाः न भवन्ति , सस्यादिकमपि बहुधा फलतीति दशरथपालने नवमसर्गे निरूपितम् । पालकाः स्वयं व्यसन वर्जितः चेत् , सत्यवाक् भवेत् चेत् प्रजाः अपि राजानं आदर्शरूपेण मार्गदर्शकं अङ्गीकुर्वन्तीति दशरथपालनेन निरूपितम् ।

न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु ।
तमुदयाद्य न वा नवयौवनां प्रियतमा यतमानमपाहरत् ।।
न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि ।
न च सपत्नजनोष्वपि तेन वागपुरुषा परुषाक्षरमीरिता ।। [7]

रामः स्वयं विग्रहवान् धर्मः इति श्रीरामद्रामायणे यदुक्तं तत्सर्वं राजधर्मं रामे कालिदासेन वर्णितम् । सत्यात् अनपतः रामः स्वयमादर्शभूतः राजा भवितुं प्राणाधिकां सीतामपि त्यक्तवान् । अतएव इदानीमपि रामराज्य पदं धर्मस्य सूचकम् । अधर्मं लेशोऽपि न तत्र भम्भवति । चतुर्दशसर्गे सीताप्रत्यागम समये रामवाक्येषु स्पष्टमिदम् ।

तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः ।
त्यक्ष्यामि वैदेहसुतां पूरस्तातत्समुद्रनेमिं पितराज्ञयेव ।। [8]

सीता परित्यागः अद्यतन दृशा अधर्मः एव । तदानीमपि तत्परित्यागः वाल्मीकिना अधर्मः इत्येव स्पष्टमुक्तवान् । उत्खातलोकत्रयकण्टकेऽपि... इति श्लोके रामे अहं समन्युः इत्यन्यधा न वहति किल, तथापि प्रजा रक्षायै राज्ञा क्वचिदधर्ममपि, क्रूरमपि कर्म करणीयमेव इति रघुवंशे निरूपितम्।

यदाहुः .....

नृशंसमनृशंसं वा प्रजारक्षणकारणात् ।
पातकं वा सदोषं वा कर्तव्यं रक्षता सदा ।। [9]

एवं सप्तदशे सर्गेऽपि परियात्रानामकस्य राज्ञः शासनं प्रजारञ्जकमासीदिति महता विस्तरेण वर्णितम् । पालकेन मन्त्रिभिः आलोच्य कर्मभिः करणीयं , रहस्य भंगः न कदापि कार्यः इतितत्र प्रतिपादितम् । अननुशासनं सार्वकालिकमेव ।

मन्त्रः प्रतिदिनं तस्य बभूव सह मन्त्रिभिः ।
स जातु सेव्यमानोऽपि गुप्तद्वारो न सूच्यते ।। [10]

एवं राजा नातिकठिनात् भवेत् न च क्रूरः न वा मृदुः भवेदिति वचनं अद्यापि पालकानां आदर्शभूतमेव ।

कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् ।
अतः सिद्धं समताभ्यामुभाभ्यामन्वियेष सः ।। [11]

सप्तदशे सर्गे विंशतयधिकाः श्लोकाः अनुशासन निरूपकाः वर्तन्ते । सारांशतस्तु राज्ञा अपधप्रवृत्तेन कदापि न भाव्यमिति । एवं रघुवंशकाव्ये उपदिष्टः सर्वे राजधर्माः सुपरिपालनव्यवस्थायाः

**निरूपकाः**, परीक्षा सहाः सार्वकालिकाः विश्वजनीनाश्च ।

**संदर्भः सूची:**

1. मनुस्मृतिः --मनुः -- अध्यायः -7, श्लोकाः --17,18,19.
2. रघुवंशमाहाकाव्यम् – कालिदासः, सर्गः--1, श्लोकः –6.
3. रघुवंशमाहाकाव्यम् – कालिदासः, सर्गः-6, श्लोकः – 25.
4. रघुवंशमाहाकाव्यम् – कालिदासः, सर्गः --1 , श्लोकः –18.
5. रघुवंशमाहाकाव्यम् – कालिदासः, सर्गः --1 , श्लोकः –24.

6. रघुवंशमाहाकाव्यम् – कालिदासः , सर्गः --6 , श्लोकः –75
7. रघुवंशमाहाकाव्यम् – कालिदासः , सर्गः--4 , श्लोकः –8
8. रघुवंशमाहाकाव्यम् – कालिदासः, सर्गः-4, श्लोकः–12.
9. रघुवंशमाहाकाव्यम्–कालिदासः, सर्गः-8,श्लोकाः-83, 84.
10. रघुवंशमाहाकाव्यम् –कालिदासः, सर्गः -9, श्लोकाः-7, 8.
11. रघुवंशमाहाकाव्यम् – कालिदासः, सर्गः-14, श्लोकः –39.
12. श्रीमद्रामायणम् -- वाल्मीकिः-- बालकाण्डः-- ताटकवधा
13. रघुवंशमाहाकाव्यम् -कालिदासः, सर्गः --17, श्लोकः -50.
14. रघुवंशमाहाकाव्यम् – कालिदासः, सर्गः --17 , श्लोकः-47.